RKMVERI/DSP/BMAIS/20-25/J2022/MT/SK-104

**SK-104 बृहदारण्यकोपनिषदि तृतीयचतुर्थाध्यायौ**

कालावधिः - होराद्वयम्  पूर्णाङ्काः - 50

A) **यथेष्टं दशानां प्रश्नानाम् एकेन पदेन वाक्येन वा उत्तरं लिखत।** **1x10=10**

1) जनको ह वैदेह इति याज्ञवल्कीयकाण्डस्य मधुकाण्डेन सह कुतो न पुनरूक्तता?
2) दानेन हि उपनमन्ते प्राणिनः इति कस्य उक्तिः?
3) जनकस्य होता कः?
4) द्विविधः कालः कः?
5) अध्वर्यौ केन भावेन दृष्टिः मुक्तिः इति उच्यते?
6) आश्वलप्रश्नसन्दर्भे मुक्तिः का, अतिमुक्तिः का?
7) “अथैतस्य प्राणस्यापः शरीरं ज्योतीरूपमसौ चन्द्रः”इति श्रुत्या कयोरेकत्वमवगम्यते?
8) प्रतिपदादीनां तिथीनां कः कर्ता?
9) यदिदमन्तरिक्षमनारम्बनमिव इत्यत्र इवकारेण किं सूच्यते?
10) सम्पन्नाम का?
11) कतिभिरिति ? कतमास्ता इति? अनयो प्रश्नयोः कीदृशं वैलक्षण्यं भाष्यकारेण दर्शितम्?
12) शस्त्रार्थं या प्रयुज्यते सा ऋग्जातिः का?
13) ऋत्विजः, ब्रह्मणः आसनं कस्यां दिशि भवति?
14) ब्रह्मा यया देवतया यज्ञं गोपायति सा देवता का?

B) **यथेष्टं पञ्चानाम् समाधानं कुरुत।** **3x5=15**

1) जनको ह वैदेह इत्याद्याख्यायिकारम्भं यथाभाष्यं प्रतिपादयत।
2) आश्वलप्रश्नोपक्रमसापेक्षतां यथाभाष्यं गमयत।
3) अहोरात्रलक्षणान्मृत्योः मुक्तिमतिमुक्तिञ्च व्याख्यात।
4) तिथ्यादिलक्षणान्मृत्योः मुक्तिमतिमुक्तिञ्च व्याख्यात।

5) सम्पदारम्भप्रयोजनं व्याख्यात।

6) होता कति स्तोत्रियाः शंसति इति समन्त्रं व्याख्यात।

7) अध्वर्युः कत्याहुतीर्जुहोति इति समन्त्रं व्याख्यात।

C) **यथेष्टं त्रयाणामुत्तरं लिखत -** **5x3=15**

1) ग्रहातिग्रहलक्षणस्य बन्धस्य स्वरूपं यथाोपनिषत् व्याख्यात।

2) सर्वं शास्त्रं निवृत्तिकारणमिति मतेन आक्षिप्य तस्य अबार्हदारण्यकत्वं व्याख्यात।

3) मृत्योर्मृत्युविषयकं प्रश्नं सदृष्टान्तं प्रतिपादयत।

4) मृत्योर्मुक्तस्य अत्रैव प्राणाः समवनीयन्त इति यथोपनिषत् व्याख्यात।

5) शरीरादीनां विनाशे पुरुषः किमाश्रितो भवति इति यथोपनिषत् व्याख्यात।

D) **एकस्योत्तरं लिखत -** **10x1=10**

1) भुज्युब्राह्मणमन्त्रार्थं यथाभाष्यं व्याख्यात।

2) यत्साक्षादपरोक्षात् ब्रह्म इत्याद्युशस्तप्रश्न याज्ञवल्क्यसमाधानस्य च य़थाभाष्यं व्याख्यानं कुरुत।

***

RKMVERI/DSP/BMAIS/2017-22/J2022/MT/SK-105

# SK-105 तैत्तिरीयोपनिषत् शाङ्करभाष्योपेता

समयः – होराद्वयम्  पूर्णाङ्कः - 50

---

**A) यथेच्छं पञ्च प्रश्नान् उत्तरत।** **1x5=5**

1) अनुशासनश्रुतिः का?
2) कश्छन्दसां विश्वरूपः?
3) वचनं किम्?
4) किं कर्मणः चातुर्विध्यम्?
5) अहर्जरः कः?
6) उपात्तदुरितक्षये विद्यायाः प्रकाशः कस्यां स्मृतौ वर्ण्यते?
7) श्रुतज्ञानं किम्?

**B) अधोलिखितानां पञ्चानां मन्त्राक्षराणामर्थं लिखत।** **1x5=5**

1) शीक्षा
2) सम्मर्षिणः
3) वस्यसः
4) आयुक्ताः
5) सन्तानः
6) सन्धानम्
7) ब्रह्मवर्चसम्

**C) यथेच्छं पञ्च प्रश्नान् उत्तरत।** **3x5=15**

1) मोक्षकारणमीमांसायां विकल्पपञ्चकमुल्लिखत।
2) उपनिषच्छब्दस्य निरुक्तिः प्रदर्शनीया।
3) आसनेन प्रश्वसितव्यम् इत्यत्र आसनशब्दार्थं व्याख्यात।
4) द्वैतमिथ्यात्वप्रतिपादिकाः पञ्च श्रुतीः लिखत।
5) यस्माज्जातं जगत्सर्वम् इत्यादिश्लोकं व्याख्यात।

6) अध्यात्मं संहितोपासनाप्रकारं लिखत।

7) “प्रतिवेशोऽसि प्र मा पाहि प्र मा पद्यस्व” इत्यस्य मन्त्रस्य कोऽर्थः?

D) **अधोलिखितेषु यथेच्छं प्रश्नत्रयमुत्तरत** **4x3=12**

1) “इत्युक्तः शीक्षाध्याय” व्याख्यात।

2) उपासनशब्दार्थं भाष्यदिशा प्रतिपादयत।

3) कर्मणां मोक्षसाधनत्वं कथं न स्यात्?

4) कैवल्यस्य ज्ञानपूर्वकत्वं कथं भवति?

5) अधीतवेदस्य कर्तव्यतां निरूपयत॥

E) **कस्यचिदेकस्य लघुप्रबन्धः विरचनीयः।** **10x1=10**

1) तैत्तिरीयभाष्यदिशा ज्ञानकर्मणोः समुच्चयानुपपत्तिं प्रपञ्चयत।

2) ओङ्काराच्छ्रियः प्रार्थना कथं विहिता तैत्तिरीयके।

***

RKMVERI/DSP/BMAIS/17-22/J2022/MT/SK-106

# SK-106 माण्डूक्यकारिकाभाष्यम्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **नीचैः दत्तेषु यथाकामं दश प्रश्नान् उत्तरत।** **1x10=10**

1) किमर्थम् अद्वैतप्रकरणम् आरभ्यते?
2) कः कृपणः स्मृतः?
3) जीवोत्पत्तिविषये कः दृष्टान्तः प्रदर्शितः कारिकायाम्?
4) जीवात्मनोरनन्यत्वे प्रमाणभूता श्रुतिः का?
5) श्रुत्युक्तः सर्वः सृष्टिप्रकारः किमर्थः?
6) केन हेतुना तैः न विरुध्यते इत्युच्यते?
7) यत्किञ्चित्सचराचरं द्वैतं कीदृशम्?
8) अस्पर्शयोगो नाम कः?
9) आवीतन्यायो नाम कः?
10) "न किञ्चिद्वस्तु जायते" इत्यत्र का युक्तिः?
11) "प्रज्ञप्तेः सनिमित्तत्वम्" इत्यत्र प्रज्ञप्तिः नाम का?
12) भूतस्य जातिं के इच्छन्ति?

B) **निम्नलिखितेषु यथारुचि षडेव विव्रियन्ताम्।** **5x6=30**

1) लीयते हि सुषुप्ते तन्निगृहीतं न लीयते।
2) ज्ञानेनाकाशकल्पेन धर्मान्यो गगनोपमान्।
3) अस्पर्शयोगो वै नाम सर्वसत्त्वसुखो हितः।
4) मृल्लोहविस्फुलिङ्गाद्यैः सृष्टिः या चोदितान्यथा।
5) यथैकस्मिन्घटाकाशे रजोधूमादिभिर्युते।
6) उपासनाश्रितो धर्मो जाते ब्रह्मणि वर्तते।
7) जीवात्मनोः पृथक्त्वं यत्प्रागुत्पत्तेः प्रकीर्तितम्।
8) सतो हि मायया जन्म युज्यते न तु तत्त्वतः।

C) **अनुप्रियमेकम् अनुबध्नीत।** **10x1=10**

1) सद्वस्तुजन्म मायिकमिति निरूप्य कारिकोक्तं ब्रह्मस्वरूपं वर्णयत।

2) “शक्यते तर्केणापि ज्ञातुम्” इति भाष्यपङ्क्तिं सप्रमाणं व्याख्यात।

***

RKMVERI/DSP/BMAIS/2018-23/J2022/MT/SK-126

**SK-126 श्रीमद्भगवद्गीता शाङ्करभाष्योपेता (13,15,18)**

समयः – होराद्वयम् पूर्णाङ्कः - 50

---

A) **यथेच्छं दश प्रश्नान् उत्तरत।** **1x10=10**

1) श्रुतिपरायणाः के?
2) क्षेत्रक्षेत्रज्ञयोः कः सम्बन्धः?
3) कः परमार्थदर्शी?
4) त्रयोदशाध्याये समस्ताध्यायार्थोपसंग्रहार्थः श्लोकः कः?
5) का आसक्तिः?
6) उपलक्षणं नाम किम्?
7) इच्छा कस्य धर्मः?
8) कर्मस्वरूपं किम्?
9) मोक्षसाधनं किम्?
10) ईश्वरस्य द्वे प्रकृती के?
11) किं नाम शौचम्?
12) ध्यानस्य किं लक्षणम्?

B) **यछेच्छं प्रश्नपञ्चकं प्रतिपादयथ** **3x5=15**

1) ऋषिभिः बहुधा गीतम् –इति श्लोकस्याभिप्रायः कः।
2) स्थावरजङ्गमयोः वर्णना प्रदीयताम्।
3) ज्ञानिनः स्थितिः आलोच्यताम्।
4) क्षेत्रक्षेत्रज्ञज्ञानस्य स्तुतिवर्णनपुरःसरं तत्फलं प्रतिपादयत।
5) संसारस्य उत्पत्तिः कथम्?
6) त्रयोदशाध्यायस्य आरम्भः किमर्थम्?
7) संक्षेपेण वक्तव्यम् – क्षेत्रं, क्षेत्रज्ञः, तयोः ज्ञानं च।

C) **त्रीन् प्रश्नान समाधत्त।** **5x3=15**

1) अद्वैतवेदान्ते स्मृतिप्रस्थानम्।
2) क्षेत्रक्षेत्रज्ञयोः स्वरूपम्।
3) “सूक्ष्मत्वात् तदविज्ञेयं दूरस्थं चान्तिके च तत्”
4) “उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः”
5) “कार्यकरणकर्तृत्वे हेतुः प्रकृतिरुच्यते”

D) **विस्तारेणैकमुत्तरत।** **10x1=10**

1) क्षेत्रस्वरूपम्
2) ज्ञानात् जन्माभावः

***

RKMVERI/DSP/BMAIS/19-24/J2022/MT/SK-131

**SK-131 ब्रह्मसूत्रभाष्ये प्रथमद्वितीयाध्यायौ**

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **यथेष्टं दशानां प्रश्ननानाम् एकेन पदेन वाक्येन वा उत्तरं लिखत।** **1x10=10**

1) अध्यासो नाम कः?
2) अन्तःकरणादिषु अध्यासमुदाहरत।
3) वेदान्ताः किमर्थमारभ्यन्ते?
4) जिज्ञासासूत्रे अथशब्दार्थः कः?
5) जिज्ञासासूत्रे अतःशब्दार्थः कः?
6) जन्माद्यस्य यतः इत्यत्र जन्मादि इति पदे कः समासः?
7) जन्मादिसूत्रे अस्य इति पदेन कस्य ग्रहणम्?
8) जन्मादिसूत्रे यतः इति पदेन कस्य निर्देशः?
9) जन्मादिसूत्रस्य विषयवाक्यं किम्?
10) शास्त्रयोनित्वादित्यत्र कथं विग्रहः?
11) तत्तु समन्वयात् इत्यत्र समन्वयपदार्थं विवेचयत।
12) अन्तस्तद्धर्मोपदेशात् सूत्रार्थं लिखत।

B) **यथेष्टं पञ्चानाम् समाधानं कुरुत।** **3x5=15**

1) जिज्ञासासूत्रे अथशब्दार्थं विचारयत।
2) ब्रह्मप्रसिद्धमुताप्रसिद्धमिति विषयमालोचयत।
3) जन्मादिसूत्रार्थं यथाभाष्यं विवृणुत।
4) क्रिया पुरुषतन्त्रा, ज्ञानं वस्तुतन्त्रं प्रतिपादयत।
5) शास्त्रयोनित्वादिति सूत्रार्थं व्याख्यात।
6) समन्वयाधिकरणस्य पूर्वपक्षमालोचयत।
7) अन्तरधिकरणस्य पूर्वपक्षमालोचयत।

C) **यथेष्टं त्रयाणामुत्तरं लिखत -** **5x3=15**

1) अन्तरधिकरणसिद्धान्तं विमृशत।

2) समन्वयाधिकरणदिशा शास्त्रप्रमाणकं ब्रह्म इति स्थापयत।

3) परिणामिनित्यत्ववादं यथाभाष्यं खण्डयत।

4) जिज्ञासासूत्रदिशा षष्ठ्यर्थं सप्रसंगं व्याख्यात।

5) जन्माद्यधिकरणं नानुमानोपन्यासार्थमिति साधयत।

D) **एकस्योत्तरं लिखत -** **10x1=10**

1) अध्यासभाष्यसारं वर्णयत।

2) शास्त्रयोनित्वाधिकरणमारचयत।

***

RKMVERI/DSP/BMAIS/18-23/J2022/MT/SK-134

# SK-134 ब्रह्मसूत्रशाङ्करभाष्यम् (2.4, 3.1)

कालावधिः - होराद्वयम् | पूर्णाङ्काः - 50

---

A) **यथाकामं दश प्रश्नान् उत्तरत।** **1x10=10**

1) प्राणस्य अणुत्वं नाम किम्?
2) मनसः पञ्च वृत्तयः काः?
3) सिद्धान्ते मुख्यप्राणः किंस्वरूपः?
4) प्राणस्यापि जीववत्स्वातन्त्र्यप्रसङ्गः, कुतः?
5) देवताधिष्ठितत्वं वागादीनाम् इत्यत्र श्रुतिप्रमाणं किम्?
6) तस्य च नित्यत्वमित्यत्र कस्य नित्यत्वमुच्यते?
7) द्वितीयाध्यायस्य चतुर्थपादेन किं प्रतिपाद्यते?
8) प्राणा अपि ब्रह्मविकारा एव इति कस्य मतम्?
9) वायुक्रियाधिकरणस्य पूर्वपक्षः कः?
10) योगशास्त्रप्रसिद्धाः मनसः वृत्तयः काः?
11) प्राणानां स्थूलत्वे को दोषः?
12) प्राणः श्रेष्ठः कुतः?

B) **यथारुचि पञ्च सूत्राणि यथाभाष्यं विव्रियन्ताम्।** **3x5=15**

1) गौण्यसम्भवात्।
2) तथा प्राणाः।
3) अणवश्च।
4) श्रेष्ठश्च।
5) अकरणत्वाच्च न दोषस्तथाहि दर्शयति।
6) अणुश्च।
7) तस्य च नित्यत्वात्।

C) **यथाच्छन्दं त्रयः समाधेयाः।** **5x3=15**

1) प्राणाणुत्वाधिकरणम्।
2) वायुक्रियाधिकरणम्।
3) ज्योतिराद्यधिकरणम्।
4) प्राणश्रैष्ठ्याधिकरणम्।

D) **यथाभिमतम् एकं व्याख्यात।** **10x1=10**

1) प्राणोत्पत्त्यधिकरणं सभाष्यं वर्णयत।
2) वायुक्रियाधिकरणदिशा प्राणः किंस्वरूपः इति निरूपयत।

***

RKMVERI/DSP/BMAIS/17-22/J2022/MT/SK-136

## SK-136 ब्रह्मसूत्रशाङ्करभाष्यम् (3.4,4)

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **यथाकामं दश प्रश्नान् उत्तरत।** **1x10=10**

1) ब्रह्मसूत्रस्य तृतीयाध्यायस्य चतुर्थपादः किमर्थं प्रवृत्तः?
2) पूर्वमीमांसकमतानुसारम् आत्मज्ञानस्य किं प्रयोजनम्?
3) “तच्छ्रुतेः” इत्यत्र का श्रुतिः उदाहृता?
4) चतुर्विधाः परिव्राजकाः के?
5) संन्यासस्य परामर्शमात्रत्वमिति कस्य मतम्?
6) “तपश्च असाधारणो धर्मः” केषां भवति?
7) आख्यानश्रुतयः किमर्थाः?
8) समन्वारम्भवचनं न मुमुक्षुविषयं कुतः?
9) पूर्वपक्षरीत्या अपहतपाप्मत्वादिविशेषणं किमर्थं भवति?
10) विद्यासाधनानि यज्ञादीनि भवन्ति कुतः?
11) किमर्थम् अमुमुक्षुणाऽपि आश्रमकर्माणि अनुष्ठेयानि?
12) ब्रह्मचर्यादिसम्पन्नस्य रागादिक्लेशानभिभवो भवतीत्यत्र श्रुतिप्रमाणं किम्?

B) **यथारुचि पञ्च सुत्राणि विव्रियन्ताम्।** **3x5=15**

1) तुल्यं तु दर्शनम्।
2) अनुष्ठेयं बादरायणः साम्यश्रुतेः।
3) भावशब्दाच्च।
4) तथा चैकवाक्यतोपबन्धात्।
5) सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्।
6) आचारदर्शनात्।
7) सर्वथाऽपि त एवोभयलिङ्गात्।

C) **यथाच्छन्दं त्रयः समाधेयाः।** **5x3=15**

1) परामर्शाधिकरणम्।
2) आश्रमकर्माधिकरणम्।
3) पारिप्लवाधिकरणम्।
4) सर्वापेक्षाधिकरणम्।

D) **यथाभिमतम् एकं व्याख्यात।** **10x1=10**

1) पुरुषार्थाधिकरणमाश्रित्य आत्मज्ञानस्य स्वातन्त्र्येण एव पुरुषार्थहेतुत्वं वर्णयत।
2) आश्रमकर्मणां विद्योत्पत्तौ उपयोगित्वं, विद्याफलोत्पत्तौ अनुपयोगित्वं च ससूत्रं निरूपयत।

***

RKMVERI/DSP/BMAIS/17-22/J2021/MT/SK-137

# SK-137 संक्षेपशारीरकम्

कालावधिः - होराद्वयम् पूर्णांकाः 50

---

A) **यथेष्टं दशानां प्रश्नानां समाधानं लिखत।** **1x10=10**

1) परवस्तुनः अद्वितीयत्वं कथमुपपद्यते ?
2) द्वितीयः श्लोकः स्त्रीलिङ्गशब्दप्रयोगेण व्याख्यातः। तत्र श्रुतिप्रमाणं किम् ?
3) कैः कर्मकाण्डं ज्ञानकाण्डं चोभयमपि स्वार्थसमन्वितं विहितम् ?
4) किम् आवरणम् ?
5) आत्मनः सुखरूपत्वप्रतिपादकम् अन्वय्यनुमानवाक्यं किम् ?
6) प्रमाणदोषाभावेऽपि प्रमातृदोषसद्भावे न प्रमेयोपपत्तिः इत्यत्रोदाहृतं दृष्टान्तद्वयं किम्?
7) वेलातटं किम् ?
8) ईश्वरव्यावृत्तिपरं सामान्यपदं विशेषपदं च किम् ?
9) अविद्या मृषा सत्यपि कथम् आच्छादयति विक्षिपति च ?
10) आत्मनः सुखरूपत्वप्रतिपादकं छान्दोग्यश्रुतिवाक्यं किम् ?
11) जीवब्रह्मणोः अखण्डवाक्यार्थप्रतिपादकं शारीरकसूत्रं किम् ?
12) कयोः विचारविषयत्वम् ?

B) **यथेष्टं पञ्चानां समाधानं कुरुत।** **3x5=15**

1) सारसङ्ग्रहदिशा संक्षेपशारीरकोक्तां भाष्यकारप्रणामं व्याख्यात।
2) आत्मनः निर्दुःखनित्यसुखस्वरूपं कथं सांख्यैः सह विरुद्ध्यते इति व्याख्यात ।
3) अज्ञानस्य शक्तिद्वयाश्रयत्वं संक्षेपशारीरकदिशा व्याख्यात ।
4) संक्षेपशारीरके ग्रन्थकर्तुः गुरुप्रणामश्लोकं व्याख्यात।
5) तत्त्वम्पदार्थयोः अन्योन्यान्वययोग्यत्वे अध्यारोपं व्याख्यात।
6) संक्षेपशारीरकग्रन्थस्य प्रकरणत्वं समर्थयत ।
7) शारीरकार्थविषयावगतिप्रधानं संक्षेपतः प्रकरणं करवाणि हृष्यन् - अर्थं वर्णयत।

C) **यथेष्टं त्रयाणां उत्तरं लिखत।** **5x3=15**

1) प्रमाणदोषाभावेऽपि प्रमातृदोषसद्भावे न प्रमेयोपपत्तिः इति विषयं दृष्टान्तद्वयानुगुणेन व्याख्यात।
2) तृतीयश्लोकाधारेण तत्त्वम्पदयोः अखण्डवाक्यार्थता
3) आत्मनः सुखात्मसिद्धौ अन्वय्यनुमानप्रमाणं दर्शयत।
4) विचारशास्त्रस्य किं प्रयोजनमिति ससारसङ्ग्रहं संक्षेपशारीरकमाश्रित्य वर्णयत।
5) विवरण-वार्तिकप्रस्थानयोः साम्यवैषम्यविचारः

D) **दीर्घप्रश्नैकम् उत्तरत ।** **10x1=10**

1) ब्रह्मणः जिज्ञास्याजिज्ञास्यत्वं पूर्वोत्तरपक्षोद्धरणपूर्वकं प्रतिपादयत।
2) आत्मनः सुखरूपत्वं चतुर्धा प्रमाणितं संक्षेपशारीरककारैः चतुर्थे प्रकरणे। तानि प्रमाणानि सश्लोकं वर्णयत।

***

RKMVERI/DSP/BMAIS/18-23/J2022/MT/SK-141

# SK-141 चतुःसूत्री भामतीसहिता

कालावधिः- होराद्वयम् पूर्णाङ्काः 50

---

A) **यथामति दशप्रश्नान् एकेन वाक्येन उत्तरत** **1x10= 10**

1) योहं बाल्ये पितरम् अन्वभवं इत्युदाहरणेन किं साध्यते?
2) जनानां किं विषयकः सन्देहः नास्ति?
3) योगव्याघ्रः इति पदस्य कोर्थः?
4) इह वेदान्तशास्त्रे किं प्रयोजनम् अभिप्रेतम्?
5) आत्मयाथात्म्यज्ञानेन कः निवर्तनीयः?
6) विषयाः इत्यत्र को धातुः?
7) शब्दगन्धरसानां च इतीयं कारिका कुत्रत्या?
8) अपच्छेदन्यायस्य प्रवृत्तिविषयकं सूत्रम् किम्?
9) सांव्यवहारिकम् इति पदस्य कोऽर्थः?
10) अध्यासलक्षणं किम्?
11) अर्थक्रियाकरित्वं नाम किम्?
12) नैय्यायिकैः का ख्यातिः अङ्गीक्रियते?

B) **अधोलिखितेषु षड्प्रश्नान् सङ्क्षेपेण व्याख्यात** **5x6= 30**

1) अध्यासः भेदाग्रहेण व्याप्तः तद्विरुद्धश्च इहास्ति भेदग्रहः इति शंकान् अनूद्य सिद्धन्तपक्षं लिखत।
2) येषुव्यावर्तमानेषु इत्यादि न्यायं सङ्क्षेपेण व्याख्यात।
3) प्रत्यक्षादिप्रमाणेषु आगमस्य एव प्राबल्यं इति विषयं सङ्क्षेपेण व्याख्यात।
4) अपच्छेदन्यायं व्याख्यात।
5) गौडप्रयोहप्रवृत्तिनिमित्तं निरूपयत।
6) आत्मनः प्रादेशिकत्वं निराकुरुत।
7) सांव्यवहारिकतात्विकप्रामाण्यं निरूपयत।

8) प्रकाशमानत्वं सत्वम् इति पक्षं निरूप्य खण्डयत

C) **निम्नलिखितेषु अनुप्रियमेकं विस्तरेण निबन्धयत** **10x1=10**

1) सदलकृत्यम् अध्यासलक्षणं व्याख्यात।

2) पीतश्शङ्खप्रतिबिम्बस्थले अध्यासलक्षणस्य समन्वयं प्रदर्शयत।

***

# SK-161 वेदान्तसारः

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **एकेन वाक्येन उत्तरत :** **1x10=10**

1) का नाम श्रद्धा?
2) वेदान्तसारस्य प्रयोजनं किम्?
3) गुरुः केन न्यायेन उपदिशति?
4) कः अध्यारोपः?
5) स्थूलसूक्ष्मप्रपञ्चलयस्थानं किम्?
6) ज्ञानविरोधि किम्?
7) कः अन्तर्यामी?
8) कारणशरीरे कः कोशः दृश्यते?
9) अस्पष्टोपाधिः कस्य भवति?
10) तुरीयचैतन्यं कदा महावाक्यस्य वाच्यं भवति?
11) मङ्गलश्लोके उक्तं ब्रह्मणः तटस्थलक्षणं किम्?
12) नित्यादिकर्मणां किं परं प्रयोजनम्?

B) **यथेच्छान् पञ्चप्रश्नान् विशदयत :** **5x3=15**

1) प्रशान्तचित्ताय जितेन्द्रियाय च... इत्यादिश्लोकमामूलचूडमुद्धृत्य व्याख्यात।
2) जगतः सृष्टौ चैतन्यस्य कारणत्वं वर्णयत।
3) घनच्छन्नदृष्टिः ... इत्यादिश्लोकं व्याख्यात।
4) अज्ञानं वर्णयत।
5) वेदान्तसारग्रन्थस्य प्रयोजनं वर्णयत।
6) काम्यनिषिद्धकर्मणां परिचयं प्रददातु।
7) वेदान्तो नाम उपनिषत्प्रमाणम् – इत्यादिवाक्यं वर्णयत।

C) **पञ्चप्रश्नान् समाधत्त :** **3x5=15**

1) अज्ञानस्य शक्तिद्वयं वर्णयत।
2) वेदान्ताधिकारिणं वर्णयत।
3) कारणशरीरं वर्णयत।
4) तदानीमेतावीश्वरप्राज्ञौ.....विविक्तं सल्लक्ष्यमिति चोच्यते – इति आमूलचूडमुद्धरत।
5) इदमज्ञानं समष्टिव्यष्ट्यभिप्रायेण ....स्थूलसूक्ष्मशरीरप्रञ्चलयस्थानमिति चोच्यते – इति आमूलचूडम् उद्धरत।

A) **एकं विशदयत** **10x1=10**

1) वेदान्तसारस्य मङ्गलं व्याख्यात।
2) अनुबन्धचतुष्टयं वर्णयत।

***

RKMVERI/DSP/BMAIS/18-23/J2022/MT/SK-163

# SK-163 वेदान्तपरिभाषा (आगमान्तः भागः)

समयावधि- होराद्वयम् पूर्णांकाः 50

---

A) **अधोलिखितदशप्रश्नान् एकेन वाक्येन उत्तरत** **1x10-10**

1) तटस्थलक्षणं किम्?
2) को नाम नमस्कारभावः, किं तस्य लक्षणम्?
3) सच्चिदानन्दविग्रहम् इतयस्य विग्रहः कः?
4) धर्मस्य अनित्यत्वं कथम् अवगम्यते?
5) प्रमाणस्य परिष्कृतं लक्षणं लिखत?
6) वेदान्ते कतिप्रमाणानि स्वीक्रियन्ते कानि च तानि?
7) ज्ञानगतप्रत्यक्षत्वस्य परिष्कृतं लक्षणं लिखत?
8) प्रमात्रभिन्नत्वं नाम किम्?
9) अन्तःकरणवृत्तेः चातुर्विध्यं तद्विषयं लिखत।
10) तत्वमस्यादिवाक्यजन्यं ज्ञानं कीदृशम्?
11) प्रातिभासिकत्वं नाम किम्?
12) मूलातूलाविद्ययोः को भेद?

B) **निम्नलिखितेषु पञ्चप्रश्नाः व्याख्यायन्ताम्** **3x5=15**

1) मनसः इन्द्रियत्वं निराकुरुत।
2) शब्दापरोक्षवादं व्याख्यात।
3) ज्ञेयगतप्रत्यक्षे तत्तदाकारवृत्युपहितत्वदलाभावे को दोषः?
4) सविकल्पकनिर्विकल्पकाभ्यां प्रत्यक्षस्य द्वैविध्यं व्याख्यात।
5) ग्रन्थादौलिखितश्लोकान् लिखत।
6) देहात्मप्रत्ययो इत्यादि श्लोकं विलिख्य अर्थं व्याख्यात।
7) प्रमालक्षणं सदलकृत्यं व्याख्यात।

C) **यथामति त्रयः समाधेयाः** **5x3=15**

1) मायायाः एकत्वानेकत्ववादं विशदयत।
2) जीवसाक्षि-ईश्वरसाक्षिभेदेन प्रत्यक्षस्य द्वैविध्यं व्याख्यात।
3) रजतस्य साक्षिणि अध्यस्तत्वे को दोषः किं च समाधानम्?
4) प्रातिभासिकपदार्थावगते अविद्यावृत्तेः कुतः अभ्युपगमः?

D) **अधस्तात् अनुप्रियम् एकं अनुबध्नीत** **10x1=10**

1) ज्ञानगतप्रत्यक्षत्वप्रयोजकं यथाग्रन्थं व्याख्यात।
2) भ्रमज्ञानोत्पत्तिप्रक्रियां निरूपयत।

***

RKMVERI/DSP/BMAIS/17-22/J2022/MT/SK-173

# SK-173 अद्वैतसिद्धौ चिताः अंशाः

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **यथाकामं पञ्च प्रश्नान् उत्तरत।** **1x5=5**

1) जडत्वहेतुविचारे प्रथमविकल्पः कः?
2) जडत्वहेतुविचारे प्रथमविकल्पे के दोषाः?
3) अज्ञानत्वं जडत्वमिति पक्षे पूर्वपक्षिमते ज्ञानत्वं कीदृशम्?
4) अज्ञानत्वं जडत्वमिति पक्षे कुतो नात्मनि व्यभिचारः?
5) सिद्धान्तिमते कस्य ज्ञानत्वम्?
6) प्राबल्यमागमस्यैव जात्या तेषु त्रिषु स्मृतम्, केषु?
7) सज्ञेयत्वस्य कति विकल्पाः सिद्धान्तिनोपस्थापिताः, के च ते?

B) **वाक्येनैकेन पञ्चानाम् उत्तरं लिखत।** **1x5=5**

1) विपक्षबाधकसत्तर्कसचिवमनुमानं कस्य बाधकम्?
2) प्रत्यक्षस्य प्रामाण्यं कुतो न निश्चितम्?
3) परीक्षा नाम का?
4) अनुमानाद्यनिवर्तितदिङ्गोहनादिनिवर्तकं किम्?
5) यत्प्रामाण्यं स्वरूपसिद्ध्यर्थं अपवादनिरासार्थञ्च यत्प्रामाण्यमुपजीवति तत् तस्य किम्?
6) अनुमानागमापेक्षिताशेषार्थग्राहकं प्रमाणं किम्?
7) औदुम्बरीं स्पृष्ट्वा उद्गायेत् इत्यदि वाक्यं केन यागेन सम्बद्धम्?

C) **सप्तसु पञ्चानां अर्थप्रकाशं कुरुत।** **3x5=15**

1) उपक्रमन्यायेन प्रत्यक्षस्य प्राबल्यं पूर्वपक्षानुसारेण निरुपयत।
2) चित्रनिम्नोन्नतज्ञानस्य चाक्षुषस्य तद्विरोधित्वाचज्ञानात् बाधो न स्यात्। सप्रसंगं व्याख्यात।
3) अनात्मत्वं वा जडत्वमिति निरूपयत।

4) अन्यथा अयं गौरश्व इत्यादेरपि गौरश्वो न भवतीत्यदितः प्राबल्यं स्यात्। सप्रंगं व्याख्यात।

5) असञ्ज्ञातविरोधित्वादर्थवादो यथाश्रुतः।
आस्थेयस्तद्विरुद्धस्य विध्युद्देशस्य लक्षणा।। व्याख्यात।

6) जडत्वहेतुविचारोकेतदिशा सञ्ज्ञातृकत्वविकल्पान् व्याख्यात।

7) प्रमाभ्रमविलक्षणं ज्ञानमिति विचारयत।

D) **पञ्चसु त्रयाणामेव लघुटिप्पणीं कुरुत।** **5x3=15**

1) सञ्ज्ञेयत्वपक्षमालोचयत।

2) जडत्वहेतुविचारे पूर्वपक्षं स्थापयत।

3) सावकाशनिरवकाशन्यायं मीमांसादिशा व्याख्यात।।

4) शीघ्रमन्थरगामित्वात् तथेह श्रुतिलिङ्गयोः। सप्रसंगं विमृशत।

5) बहुबाधाऽ न्याय न्यायं मीमांसादिशा विवृणुत।

E) **अनुप्रियमेकम् अनुबध्नीत।** **10x1=10**

1) प्रत्यक्षस्य लिङ्गबाध्यत्वं यथाग्रन्थं विचारयत।

2) प्रत्यक्षं जात्या प्राबलमिति उपस्थाप्य खण्डयत।

***

RKMVERI/DSP/BMAIS/20-25/J2022/MT/SK–213

## SK-213 समासप्रकरणम्

कालः – होराद्वयम् पूर्णाङ्कः – 50

---

A) **यथेच्छं दश प्रश्नाः समाधेयाः ।** **1x10 =10**

1) यथार्थाः के ?
2) तिष्ठगुप्रभृतीनि च इत्यनेन सूत्रेण किं विधीयते ?
3) राजपूजितः इत्यत्र कथं समासः ?
4) कृत्यैर्ऋणे इति सूत्रे ऋणग्रहणं किमर्थम् ?
5) गिरेश्च सेनकस्य इति सूत्रे सेनकग्रहणं किमर्थम् ?
6) अधिकार्थवचनं नाम किम् ?
7) वाक्कलहः इत्यत्र समास केन ?
8) अभ्याशादात इत्यत्र प्रातिपदिकावयवस्य सुपो लुक् कथं न भवति ?
9) अत्ययः इत्यस्यार्थः कः ?
10) भवतः शयिका इत्यत्र समासनिषेधकं सूत्रं किम् ?
11) क्षेपे इत्यस्यार्थः कः ?
12) याजकादिभिश्च इत्यस्य कोऽर्थः ?

B) **यथेच्छं पञ्च प्रश्नान् समादधतु ।** **3x5 = 15**

1) भूतपूर्वः इति रूपं साधयतु ।
2) ब्राह्मणयाजकः इति रूपं साधयतु ।
3) शङ्कुलाखण्डः इति रूपं साधयतु।
4) उपकृष्णम् इति रूपं साधयतु।
5) अन्नेन व्यञ्जनमिति सूत्रं व्याख्यात।
6) एकविभक्ति चापूर्वनिपाते इति सूत्रं व्याख्यात।
7) नदीभिश्च इति सूत्रं व्याख्यात।

C) **यथेच्छं त्रयः प्रश्नाः समाधेयाः।** **5x3 = 15**

1) कर्तृकरणे कृता बहुलमिति सूत्रं व्याख्यात।
2) तृतीया तत्कृतार्थेन गुणवचनेन इति सूत्रं व्याख्यात।
3) याजकादिभिश्च इति सूत्रं व्याख्यात।
4) सह सुपा इति सूत्रं व्याख्यात।
5) चतुर्थी तदर्थार्थबलिहितसूखरक्षितैः इति सूत्रं व्याख्यात।

D) **यथेच्छम् एकं प्रश्नं समादधतु।** **10x1=10**

1) पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन इति सूत्रं व्याख्यात।
2) षष्ठीसमासनिषेधकानि सूत्राणि व्याख्यात।

***

RKMVERI/DSP/BMAIS/2018-23/J2022/MT/SK-216

# **SK-216 सिद्धान्तकौमुद्यां तद्धितप्रकरणे अपत्याधिकारात् प्राग्वहतीयं यावत्**

कालावधिः- होराद्वयम् पूर्णाङ्कः – 50

---

A) **नीचैः दत्तेषु दश प्रश्नान् उत्तरत।** **1×10=10**

1) अश्वपत्यादिभ्यश्च इति सूत्रेण विधीयमानोऽण् कस्य अपवादभूतः।
2) गव्यम् इत्यत्र यत्प्रत्ययः केन विधीयते।
3) गोत्रसंज्ञाविधायकं सूत्रं किम।
4) युवसंज्ञाविधायकम् एकं सूत्रं लिखतु।
5) सौधातकिः इत्यत्र केन सूत्रेण कः प्रत्ययः।
6) यञञोश्च इति सूत्रेण किं विधीयते।
7) यञिञोश्च इति सूत्रेण किं विधीयते।
8) दाण्डिनायनेत्यादिसूत्रं पूरयत।
9) पाप्मना भ्रातृव्येन इति कथं भवति।
10) 10)अणो द्व्यचः इति सूत्रेण विधीयमानोऽण् कस्य अपवादभूतः।
11) मातुलः इत्यत्र कः प्रत्ययः।
12) सौम्यम् इत्यत्र केन सूत्रेण कः प्रत्ययः।

B) **अधो लिखितेषु पञ्च समाधत्त।** **3×5=15**

1) वत्यर्थे न, स्त्री पुंवच्च इति ज्ञापकात् इति पङ्क्तिं व्याख्यात।
2) पाणिनिः इति रूपं साधयत।
3) हरितादिभ्योऽञः इति सूत्रं व्याख्यात।
4) चटकाया ऐरक् इति सूत्रं व्याख्यात।
5) तेन रक्तं रागात् इति इति सूत्रं व्याख्यात।
6) ब्राह्मो जातौ इति सूत्रं व्याख्यात।
7) वामदेवाड्ड्यड्ड्यौ इति सूत्रं व्याख्यात।

C) **अधो लिखितेषु त्रयः समाधेयाः।** **5×3 = 15**

1) लुबविशेषे इति सूत्रं व्याख्यात।
2) ऋष्यन्धकवृष्णिकुरुभ्यश्च इति सूत्रं व्याख्यात।
3) मातुरुत्संख्यासंभद्रपूर्वायाः इति सूत्रं व्याख्यात।
4) तत्प्रत्ययस्य च इति सूत्रं व्याख्यात।
5) द्विगोर्लुगनपत्ये इति सूत्रं व्याख्यात।

D) **अधः प्रदत्तयोः एकः प्रश्नः समाधेयः।** **10×1=10**

1) समर्थानां प्रथमाद्वा इति सूत्रं व्याख्यात।
2) तस्यापत्यम् इति सूत्रं व्याख्यात।

***

RKMVERI/DSP/BMAIS/17-22/J2022/MT/SK-218

## SK-218 सिद्धान्तकौमुद्यां तद्धितप्रकरणे प्राग्घितीयात् द्विरुक्तं यावत्

कालावधिः- होराद्वयम् पूर्णाङ्काः- ५०

---

A) **यथेच्छं दश प्रश्नाः समाधेयाः।** **1x10=10**

1) वश्यशब्दस्य कोऽर्थः?
2) छन्दस्यम् इत्यस्य कोऽर्थः?
3) समानोदर्यः इत्यस्य विग्रहं लिखत।
4) आचार्यभोगीनः इत्यत्र णत्वं कुतो न?
5) तदर्थं विकृतेः प्रकृतौ इत्यस्यार्थं लिखत।
6) पञ्चकः इत्यत्र केन कन्?
7) चित्तवति नित्यम् इति सूत्रस्यार्थं लिखत।
8) आग्निष्टोमिकी इत्यत्र ठञ् कथम्?
9) भूतभाविशब्दयोः कोऽर्थः?
10) मासिको ब्रह्मचारी इत्यत्र मासिकशब्दस्य कोऽर्थः?
11) उत्पातो नाम किम्?
12) वातिकम् इत्यत्र केन ठक्प्रत्ययः?

B) **यथाकामं पञ्च समाधत्त।** **3x5=15**

1) गार्हपत्यः इति रूपं साधयत।
2) शून्यम् इति रूपं साधयत।
3) पारिखेयी इति रूपं साधयत।
4) तेन तुल्यं क्रिया चेद्वतिः इति सूत्रं व्याख्यात।
5) द्विसांवत्सरिकः इति रूपं साधयत।
6) शारदम् इति रूपं साधयत।
7) शताच्च ठन्यतावशते इत्यत्र अशते इति पदं किमर्थम्?

C) **यथाकामं त्रीन् समाधत्त।** **5x3=15**

1) नौवयोधर्म.... इति सूत्रं व्याख्यात।
2) ये च तद्धिते इति सूत्रं व्याख्यात।
3) गुणवचनब्राह्मणादिभ्यः कर्मणि च इति सूत्रं व्याख्यात।
4) तदस्मिन्वृद्ध्यायलाभशुल्कोपदा दीयते इति सूत्रं व्याख्यात।
5) संख्यायाः संज्ञासङ्घसूत्राध्ययनेषु इति सूत्रं व्याख्यात।

D) **निम्नलिखितेषु अनुप्रियमेकम् अनुबध्नीत।** **10x1=10**

1) तत्र साधुः इत्यस्मिन् अर्थे प्रत्ययान् विवृणुत।
2) परिमाणान्तस्यासंज्ञाशानयोः इति सूत्रं व्याख्यात।

***

RKMVERI/DSP/BMAIS/19-24/J2022/MT/SK-221

## SK-221 भ्वादिप्रकरणम्

कालावधिः- होराद्वयम् पूर्णाङ्कः- ५०

---

A) **यथेष्टं दशप्रश्नाः समाधेयाः।** **1x10=10**

1) अभ्यासे चर्च इति सूत्रे चकारेण कस्य समुच्चयः ?
2) आत्मनेपदसंज्ञा-विधायकं सूत्रं किम् ?
3) आर्धधातुकं शेषः इत्यत्र शेषपदेन कस्य ग्रहणं कर्तव्यम् ?
4) तिप्तस्झि..इति सूत्रं सम्पूर्णं लिखतु ?
5) असिद्धवदत्राभात् इति अधिकारः कमभिव्याप्य प्रवर्तते ?
6) नित्यं ङितः इत्यनेन किं विधीयते ?
7) लोट्-लकारः कस्मिन्नर्थे विधीयते, सूत्रञ्च किम् ?
8) दश लकारेषु छन्दोमात्रगोचरो लकारः कः ?
9) अतो हेः इति सूत्रेण किं क्रियते ?
10) लिटस्तिवादीनां णलाद्यादेशविधायकं सूत्रं किम्?
11) लृट् शेषे च इति सूत्रस्य सामान्यार्थं लिखतु ?
12) लादेशा: कां संज्ञां प्राप्नुवन्ति?

B) **यथेष्टं पञ्च समाधत्त।** **3x5=15**

1) 'बभूविथ' इति रूपं साधयत।
2) ङित्त्वोक्तेर्ज्ञायते क्वचिदनुबन्धकार्येप्यनलविधौ इति प्रतिषेधः – इति पङ्क्तिं वर्णयत।
3) लिङ् लकारस्य प्रयोग: केषु-केषु अर्थेषु भवति?
4) भवन्ति इति रूपं साधयत।
5) 'भवेत्' इति रूपं साधयत।
6) 'भव' इत्यस्य रूपसिध्दिं वर्णयत।
7) वुकोऽसिद्धत्वादुवङि प्राप्ते वुग्युटोवुवङ्यणोः सिद्धौ वक्तव्यौ- इति पङ्क्तिं वर्णयत।

C) **यथेष्टं प्रश्नत्रयं समाधत्त।** **5x3=15**

1) लिटि धातुरनभ्यासस्य इति सूत्रं व्याख्यायताम्।
2) अभ्यासे चर्च इति सूत्रं सोदाहरणं निरूप्यताम्।
3) तुह्योस्तातङ्ङाशिष्यन्यतरस्याम् इति सूत्रं व्याख्यायताम्।
4) पुगन्तलघूपधस्य च इति सूत्रं व्याख्यायताम्।
5) स्वरितञितः कर्त्रभिप्राये क्रियाफले इति सूत्रं व्याख्यायताम्।

D) **अन्यतरं समाधत्त।** **10x1=10**

1) अतो येयः इति सूत्रं व्याख्यायताम्।
2) तिङ्प्रत्ययानां प्रथममध्यमोत्तमव्यवस्थां निरूपयत।

***

RKMVERI/DSP/MAIS/19-24/J2022/MT/SK-223

## SK-223 सिद्धान्तकौमुद्याम् अदादितः णिजन्तपर्यन्तम् (सूसं.180)

समयः एकहोरा पूर्णाङ्कः -50

---

A) **षट्प्रश्नाः समाधेयाः** **1x10=10**

1) अदः सर्वेषामिति सूत्रेण किं विधीयते।
2) घस्लृधातोः लृदित्करणस्य किं तात्पर्यम्।
3) जहि इत्यत्र कथन्न हेर्लुक्।
4) शेरते इत्यत्र रुडागमः केन।
5) समीयात् इति प्रयोगः कथं सिध्यति।
6) इणो यण् इति सूत्रं कस्य सूत्रस्य अपवादभूतम्।
7) णेरध्ययने वृत्तम् इति निर्देशात् किं सिद्धान्तितम्।
8) "अयमन्तिपरो न प्रयुज्यते" इति कस्य धातोः विषये उच्यते ग्रन्थकृद्भिः।
9) विदांकुर्वन्त्वित्यन्यतरस्याम् इति सूत्रे इतिशब्दात् किं ज्ञापितम्।
10) गणकार्यमनित्यम् इत्यत्र किं लिङ्गम्।
11) स्तः इत्यत्र अल्लोपः केन सूत्रेण विधीयते।
12) मृजन्ति, मार्जन्ति इत्यत्र रूपद्वयं कथं सिध्यति।

B) **यथाशक्यं पञ्चप्रश्नान् उत्तरत।** **3x5=15**

1) श्नतसोरल्लोपस्याभीयत्वेनासीद्धत्वादाट् – पङ्क्त्यर्थः परिष्क्रियताम्।
2) तातङ्पक्षे एत्वं न। परेण तातङा बाधात् – इति पङ्क्तिं व्याख्यात्।
3) ससीतयो राघवयोरधीयन् – इति प्रयोगेण किं दर्शितं ग्रन्थकृता, सप्रसङ्गं व्याख्यात।
4) णेरध्ययने वृत्तम् इति निर्देशात् किं सिद्धान्तितं ग्रन्थकृता, सप्रसङ्गं लिखत।
5) रूपं साधयत – अवोचत्।
6) यौति इति रूपं ससूत्रं साधयत।
7) रूदादिभ्यः सार्वधातुके इति सूत्रं व्याख्यात।

**A) यथाशक्यं त्रयम् उत्तरत।** **5x3=15**

1) रूपं साधयत – विदांकुर्वन्तु।
2) रूपं साधयत – जघान
3) सूत्रं व्याख्यात – न न्द्राः संयोगादयः
4) विदो लटो वा इति सूत्रं सोदाहरणं व्याख्यात।
5) अध्यगीष्ट इति रूपं साधयत।

**B) यथेष्टमेकं समाधत्त।** **10x1=10**

1) घ्वसोरेद्धावभ्यासलोपश्च इति सूत्रं सिद्धान्तकौमुदीदिशा व्याख्यात।
2) तुरुस्तुशम्यमः सार्वधातुके इति सूत्रं सोदाहरणं व्याख्यात।

***

RKMVERI/DSP/BMAIS/18-23/J2022/MT/SK-225

## SK-225 सिद्धान्तकौमुद्यां सन्नन्ताल्लकारार्थं यावत्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **नीचैः दत्तेषु यथेच्छं दश प्रश्नान् उत्तरत।** **1x10=10**

1) परस्मैपदसंज्ञाविधायकं सूत्रं किम् ?
2) आत्मनेपदसंज्ञाविधायकं सूत्रं किम् ?
3) शेते इत्यत्र केन आत्मनेपदम् ?
4) भावकर्मणोः इत्यस्य किमुदाहरणम् ?
5) नेर्विशः इत्यस्य किमुदाहरणम् ?
6) पराजयते इत्यत्र केन आत्मनेपदम् ?
7) हरतेरप्रतिषेधः इत्यस्य किमुदाहरणम् ?
8) सन्यतः इति सूत्रेण किं भवति?
9) सनः आर्धधातुकसंज्ञा केन भवति?
10) दिदीषते इत्यत्र कः धातुः?
11) चिकीषति इत्यत्र केन कुत्वम् ?
12) सन्नन्तस्य धातुसंज्ञा केन?

B) **अधोलिखितेषु यथारुचि पञ्च प्रयोगान् समाधत्त।** **3x5=15**

1) विविदिषति।
2) दुद्यूषति।
3) ईप्सति।
4) पिपठिषति।
5) धिप्सति।
6) जिघत्सति।
7) मुमुषिषति।

C) **अत्र यथाच्छन्दं त्रयः समाधेयाः।** **5x3=15**

1) अज्झनगमां सनि इति सूत्रं व्याख्यात।
2) सनि च इति सूत्रस्य व्याख्यां लिखत।
3) इको झल् इति सूत्रस्य व्याख्यां कुरुत।
4) जिघृक्षति इति प्रयोगं ससूत्रं लिखत।
5) सुषुप्सति इति प्रयोगं ससूत्रं वर्णयत।

D) **निम्नलिखितेषु अनुप्रियमेकम् अनुबध्नीत।** **10x1=10**

1) हलन्ताच्च इति सूत्रं सोदाहरणं सपदकृत्यं प्रतिपादयत।
2) रलो व्युपधाद्धलादेः संश्च इति सूत्रं सोदाहरणं सपदकृत्यं प्रतिपादयत।

***

# SK-228 सिद्धान्तकौमुद्याम् उत्तरकृदन्तप्रकरणम्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **द्वादशसु दश समाधत्त।** **1x10=10**

1) प्रश्रयः इत्यत्र कः कृत्प्रत्ययः?
2) भावे इति सूत्रस्यार्थं लिखत।
3) विसारः इत्यस्य कोऽर्थः?
4) सृ स्थिरे इति सूत्रे सृ इत्यत्र का विभक्तिः?
5) अण् कर्मणि च इति सूत्रेण विहितः अण्प्रत्ययः कस्यापवादः?
6) समि मुष्टौ इति सूत्रेण किं विधीयते?
7) प्रथने वावशब्दे इति सूत्रस्यार्थं लिखत?
8) ॠदोरप् इति सूत्रस्योदाहरणं लिखत।
9) घञपोश्च इति सूत्रस्यार्थं लिखत?
10) संज्ञायाम् इति सूत्रेण कः प्रत्ययः विधीयते?
11) रादिफः इति वार्तिकेण कः प्रत्ययः विधीयते? किञ्चोदाहरणम्?
12) स्थागापापचो भावे इति सूत्रेण विहितः क्तिन्प्रत्ययः कस्यापवादः?

B) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) "तेनेह न- 'भूतानि कालः पचतीति वार्ता'।" इति पङ्क्तिं व्याख्यात।
2) श्रायः इति रूपं साधयत।
3) "स्त्रियां क्तिन्" इति सूत्रं व्याख्यात।
4) "अत्र वाऽसरूपेण तृजादयो न, पुनर्ण्वुलुक्तेः" इति पङ्क्तिं व्याख्यात।
5) रागः इति रूपं साधयत।
6) "अण् कर्मणि च" इति सूत्रं व्याख्यात।
7) "स्थागापापचो भावे" इति सूत्रं व्याख्यात।

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) "पर्याप्तिवचनेष्वलमर्थेषु" इति सूत्रं व्याख्यात।
2) "व्याधिमत्स्यबलेषु चेति वाच्यम्" इति वार्तिकं व्याख्यात।
3) पक्त्रिमम् इति रूपं साधयत।
4) "गुरोश्च हलः" इति सूत्रं व्याख्यात।
5) "प्रथमे वावशब्दे" इति सूत्रं व्याख्यात।

D) **द्वयोरेकं समाधत्त।** **10x1=10**

1) तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्, समानकर्तकेषु तुमुन् इति च सूत्रे व्याख्यात।
2) निवासचितिशरीरोपसमाधानेष्वादेश्च कः, सङ्घे चानौत्तराधर्ये चेति सूत्रे व्याख्यात।

***

RKMVERI/DSP/BMAIS/21-26/J2021/MT/SK-237

## SK-237 लघुसिद्धान्तकौमुद्याम् अजन्तस्त्रीलिङ्गादव्ययप्रकरणं यावत् स्त्रीप्रत्ययाश्च

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **यथाकामं द्वादशसु दश समाधेयाः।** **1x15=15**

1) ज्ञानम् इत्यत्र सोरमादेशः केन सूत्रेण?
2) नपुंसकाच्च इति सूत्रस्य कोऽर्थः?
3) ज्ञानानि इत्यत्र नुम् केन सूत्रेण?
4) हे वारे इत्यत्र न लुमताङ्गस्य इत्यनेन गुणनिषेधः कुतो न?
5) दध्ना इत्यत्र अनङ् केन सूत्रेण?
6) प्रद्युना इत्यत्र मूलं प्रातिपदिकं किम्?
7) स्त्रियाम् इत्यस्य अधिकारावधिं लिखत?
8) अहंयुः इत्यस्य कोऽर्थः?
9) कृत्वा इत्यस्य अव्ययसंज्ञा केन सूत्रेण?
10) सदृशं त्रिषु .... श्लोकं पूरयत?
11) क्रोष्ट्री इत्यत्र कः स्त्रीप्रत्ययः, केन सूत्रेण?
12) स्वस्रादयः के सन्ति?

B) **यथेच्छं पञ्च रूपाणि साधयत।** **3x5=15**

1) ज्ञाने
2) वारिणी
3) दध्नि
4) लिट्
5) अजा
6) मधु
7) भवती।

C) **यथाकामं पञ्चसु त्रीन् समाधत्त।** 5x3=15

1) इकोऽचि विभक्तौ इति सूत्रं व्याख्यात।

2) विभाषा ङिश्योः इति सूत्रं व्याख्यात।

3) वष्टि भागुरिरित्यादिश्लोकं पूरयित्वा व्याख्यात।

4) ज्ञानानि इतिरूपं ससूत्रं साधयत।

5) पचन्ती इति रूपं ससूत्रं साधयत।

D) **यथेच्छं द्वयोः एकं समाधत्त।** 10x1=10

1) अजाद्यतष्टाप् इति सूत्रं व्याख्यात।

2) स्वरादिनिपातमव्ययम् इति सूत्रं व्याख्यात।

***

RKMVERI/DSP/BMAIS/21-26/J2022/MT/SK-238

# SK-238 लघुसिद्धान्तकौमुद्यां तिङन्तप्रकरणम्

समयः- होराद्वयम् | पूर्णाङ्कः- 50

---

A) **दशप्रश्नाः समाधेयाः 1x10=10**

1) मध्यमोत्तमयोरविषये कः स्यात्।
2) शप्-प्रत्ययः कदा विधीयते।
3) परस्मैपदसंज्ञाविधायकं सूत्रं लिखत।
4) जगाद जगद इति रूपद्वयं कथम्।
5) आयप्रत्ययविधायकं शास्त्रं किम्।
6) अभूत् इत्यत्र गुणनिषेधकं सूत्रं किम्।
7) ईडागमविधायकं सूत्रं किम्।
8) लिङ्निमित्तं किम्।
9) नेर्गदनद… इति सूत्रं पूरयत।
10) किं नाम अधीष्टम्।
11) टुनदि समृद्धौ इति धातोः टु-इत्यस्य इत्संज्ञा केन।
12) अर्चधातोः अर्थ

B) **यथाशक्यं पञ्चप्रश्नान् उत्तरत। 3x5=15**

1) विधिनिमन्त्रणमिति सूत्रं व्याख्यात।
2) लङर्थं विवृणुत।
3) अतो येयः इति सूत्रं व्याख्यात।
4) रूपं साधयत – भूयासुः
5) रूपं साधयत – जगाद
6) रूपं साधयत – नेदिथ
7) रूपं साधयत – अकटीत्।

**C) यथाशक्यं त्रयम् उत्तरत।** **5x3=15**

1) अस्तिसिचोऽपृक्ते इति सूत्रं व्याख्यात।

2) रूपं साधयत – अगादीत्, अगादीत्।

3) तुह्योस्तातङाशिष्यन्यतरस्याम् इति सूत्रं व्याख्यात

4) लिटि धातोरनभ्यासस्य इति सूत्रं व्याख्यात।

5) लुटः प्रथमस्य डारौरसः इति सूत्रं व्याख्यात।

C) **यथेष्टमेकं समाधत्त।** **10x1=10**

1) पदकृत्यसहितम् अत एकहल्मध्येऽनादेशादेर्लिटि इति सूत्रं व्याख्यात।

2) गोपायाञ्चकार इति रूपं /साधयत/।

***

RKMVERI/DSP/BMAIS/17-22/J2022/MT/SK-243

## SK-243 महाभाष्ये 8,9 आह्निके

कालावधिः- होराद्वयम् पूर्णाङ्कः-50

---

A) **यथेष्टं दशप्रश्नाः समाधेयाः ।** **1x10=10**

1) आदेश्यल्याश्रीयमाणे कुरू इत्यत्र कथं दोषवारणम् ?
2) शब्दानामनित्यत्ववारणाय स्थानिवत्सूत्रे किमुक्तम् ?
3) भारद्वाजीयाः वार्तिकानि कानि ?
4) को नाम आदेशः ?
5) कार्या नाम किम् ?
6) परस्मिन् इत्यस्य असाधारणं प्रयोजनं किम् ?
7) पूर्वविधि इत्यस्य प्रयोजनं किम् ?
8) विधिग्रहणस्य भाष्यसम्मतं प्रयोजनं किम् ?
9) स्तोष्याम्यहं.............ध्वंस्यते च इति वार्तिकं लिखत ।
10) प्रत्ययस्य लुक्श्लुलुपः इत्यत्र प्रत्ययग्रहणस्य असाधारणं प्रयोजनं भाष्ये किं सिद्धान्तितम् ?
11) अदर्शनं लोपः इत्यत्र स्वं रूपम् इति वचनात् कस्य संज्ञा प्राप्नोति ?
12) यदि प्रसक्तात् अदर्शनं लोपसंज्ञं भवति इत्युच्यमाने क्व दोषः उक्तः ?

B) **यथेष्टं पञ्च समाधत्त ।** **3x5=15**

1) अदर्शनं लोपः इत्यत्र इतरेतराश्रयं उद्भाव्य परिहरत ।
2) प्रसक्तात् अदर्शनं लोपसंज्ञं भवति षष्ठीनिर्दिष्टस्य इति सप्रसंगं व्याख्यात ।
3) कंसीयपरशव्ययोर्विशिष्टनिर्देशात् सिद्धम् इति वार्तिकं व्याख्यात ।
4) कार्यविपरिणामाद्वा सिद्धम् इति वार्तिकं व्याख्यात ।
5) एकदेशविकृतस्योपसंख्यानम् इति वार्तिकस्य गतार्थतां निरूपयत ।
6) सिद्धं तु षष्ठीनिर्दिष्टस्य स्थानिवद्वचनात् इति वार्तिकसन्दर्भं निरूपयत ।
7) अचः परस्मिन्नित्यत्राज्ग्रहणस्य प्रयोजनं लिखत ।

C) **यथेष्टं प्रश्नत्रयं समाधत्त ।** **5x3=15**

1) प्रत्ययस्य लुक्श्लुलु  पः इत्यत्र प्रत्ययग्रहणस्य प्रयोजनं यथाभाष्यं निरूपयत ।

2) सामान्यातिदेशे हि विशेषानतिदेशः यथाग्रन्थं निरूपयत ।

3) तस्य दोषस्तयादेश उभयप्रतिषेधः इति वार्तिकं यथाभाष्यं लिखत ।

4) अचः परस्मिन् इत्यत्र विधिग्रहणस्य प्रयोजनं निरूपयत ।

5) अदर्शनं लोपः इति सूत्रं यथाभाष्यं व्याख्यात् ।

D) **अन्यतरं समाधत्त ।** **10x1=10**

1) अपरविधौ तु वक्तव्यम् इति वार्तिकं व्याख्यात ।

2) स्थानिवत्सूत्रसत्त्वे के दोषाः ?

***

RKMVERI/DSP/BMAIS/17-22/J2022/MT/SK-257

## SK-257 व्याकरणसाहित्येतिहासः

समयावधिः- होराद्वयम् पूर्णाङ्काः-50

---

A) **दश समाधेयाः** **१ x १०=१०**

1) प्रातिपदिकग्रहणे इति परिभाषायाः ज्ञापकं किम्?
2) प्रातिपदिकग्रहणे इति परिभाषायाः अनित्यता कथम्?
3) बहुव्रीहौ अतद्गुणसंविज्ञानस्य ग्रहणं भवति उत न?
4) तद्गुणसंविज्ञानस्य शास्त्रीयम् उदाहरणं किम्?
5) अतद्गुणसंविज्ञानस्य शास्त्रीयम् उदाहरणं किम्?
6) यतोऽनावः इति सूत्रे अनौप्रतिषेधः कस्याः परिभाषायाः ज्ञापकः?
7) स्वरविधौ इत्यस्य कोऽर्थः?
8) ताच्छीलिके णेऽण्कृतानि भवन्ति इत्यस्य प्रयोजनान्तरं नव्यमते किम्?
9) साम्प्रतिकाभावे भूतपूर्वगतिः इति परिभाषा कीदृशी?
10) निरनुबन्धकतदनुबन्धकपरिभाषे प्रत्ययाप्रत्ययसाधारणे इत्यत्र किं मानम्?
11) नेदमदसोरकोः इति सूत्रे अकः इति निषेधः कस्याः ज्ञापकः?
12) चानुकृष्टं नोत्तरत्र इति परिभाषाया अनित्यता कथम्?

B) **यथाभीष्टं पञ्च परिभाषाः व्याख्यात** ३ x ५=१५

1) विभक्तौ लिङ्गविशिष्टाग्रहणम्।
2) सूत्रे लिङ्गवचनम् अतन्त्रम्।
3) नञिवयुक्तम् अन्यसदृशाधिकरणे तथा ह्यर्थगतिः।
4) हल्स्वरप्राप्तौ व्यञ्जनम् अविद्यमानवत्।
5) निरनुबन्धकग्रहणे न सानुबन्धकस्य।
6) क्वचित् स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते।
7) ताच्छीलिके णेऽण्कृतानि भवन्ति।

C) **यथाभीष्टं तिस्रः परिभाषाः व्याख्यात** ५ x ३ = १५

1) प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्।
2) सन्नियोगशिष्टानाम् अन्यतरापाये उभयोरप्यपायः।
3) स्वरविधौ व्यञ्जनम् अविद्यमानवत्।
4) धातोः कार्यम् उच्यमानं तत्प्रत्यये भवति।
5) लुग्विकरणालुग्विकरणयोरलुग्विकरणस्य।

D) **यथाभीष्टम् एकां परिभाषां व्याख्यात** **१० x १= १**

1) गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः।
2) सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य।

***

RKMVERI/DSP/MAIS/18-23/J2022/MT/SK-266 WW

# SK-266 लघुशब्देन्दुशेखरे अजन्तभागः

कालावधिः- होराद्वयम् | पूर्णाङ्कः- 50

---

A) **यथेष्टं दशप्रश्नाः समाधेयाः ।** **1x10=10**

1) अधातु इति पर्युदासेन व्याख्यानात् कस्य लाभः सम्भवति ?
2) धात्वादीनां........न विद्यते इति कारिकां लिखत ।
3) अनुवृत्तिसामर्थ्याद् इत्यनेन किं सूचितम् ?
4) पञ्चनावप्रियः इत्यत्र पञ्चनाव इत्यस्य प्रातिपदिकसंज्ञा भवति न वा ?
5) अर्थवत्सूत्रे अर्थवत्पदेन कस्य व्यावृत्तिः भवति ?
6) यत्र सङ्घाते पूर्वभागः पदम् इत्यत्र पदशब्देन किं गृह्यते ?
7) देवदत्तो गार्ग्यः इति समुदायस्य यञन्तत्वेन प्राप्तप्रातिपदिकसंज्ञायाः वारणं भाष्यकारेण कथं कृतम् ?
8) वाक्यस्य प्रातिपदिकत्वे कः दोषः ?
9) परश्च इति सूत्रेण नियमद्वयं किं क्रियते ?
10) प्रकृतिर्नाम का ?
11) ङ्याप्प्रातिपदिकात् इति सूत्रे प्रातिपदिकग्रहणस्य असाधारणं प्रयोजनं किम् ?
12) सौवरीणां सप्तमीनां का सप्तमीत्वम् उक्तम् ?

B) **यथेष्टं पञ्च समाधत्त ।** **3x5=15**

1) परिनिष्ठितलक्षणं यथाग्रन्थं व्याख्यात ।
2) नञिवयुक्तन्यायस्य अनित्यत्वज्ञापनार्थंकिं पदमुक्तम् ? यथाग्रन्थं व्याख्यात ।
3) तद्धितग्रहणस्य नियमार्थतां निरूपयत ।
4) गवित्ययमाह इत्यादौ समुदायस्य प्रातिपदिकत्वं कथं वार्यते ?
5) वाक्यस्य प्रातिपदिकसंज्ञायां कः दोषः ? यथाग्रन्थं निरूपयत ।
6) ङ्याप्प्रातिपदिकात् इत्यत्र ङ्याब्ग्रहणं कस्योपलक्षणम् ?
7) तिङन्तेभ्यः तद्धितोत्पत्तिर्न भवति इति कथं साधितम् ? सप्रसंगं लिखत ।

C) **यथेष्टं प्रश्नत्रयं समाधत्त ।** **5x3=15**

1) परश्च इत्यस्य अनुपस्थितौ तत्सन्नियोगशिष्टप्रत्ययसंज्ञायाः अप्रवृत्तिः इति मतं यथाग्रन्थं खण्डयत ।
2) परश्च इति सूत्रं व्याख्यात ।
3) लिङ्गविशिष्टपरिभाषां व्याख्यात ।
4) कृतद्धितसूत्रे समासग्रहणनियमं प्रतिपादयत ।
5) अर्थवत्त्वं परिष्करोतु ।

D) **अन्यतरं समाधत्त ।** **10x1=10**

1) ङ्याप्प्रातिपदिकात् इति सूत्रं यथाग्रन्थं व्याख्यात।
2) अत्यन्तस्वार्थिकानां सुबुत्पत्तेः पूर्वमुत्पत्तिं साधयत।

***

RKMVERI/DSP/BMAIS/17-22/J2022/MT/SK-268

# SK-268 लघुशब्देन्दुशेखरे स्त्रीप्रत्ययाव्ययीभावप्रकरणे

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **नीचैः दत्तेषु यथेच्छं दश प्रश्नान् उत्तरत।** **1x10=10**

1) पुंस्त्वस्य लौकिकं शास्त्रीयं च लक्षणं किम् ?
2) स्त्रीत्वस्य लौकिकं शास्त्रीयं च लक्षणं किम् ?
3) चटका इत्यत्र इत्त्वं कुतो न?
4) पञ्चसुत्वरी इत्यस्य विग्रहः कः?
5) नपुंसकत्वस्य लौकिकं शास्त्रीयं च लक्षणं किम् ?
6) अश्विका इत्यत्र केन इत्वम् ?
7) शुभंयाः इत्यस्य विग्रहः कः?
8) त्यकनश्च इत्यस्य उदाहरणं किम् ?
9) नरिका इत्यस्य विग्रहः कः?
10) शर्वरी इत्यत्र कः कृत्प्रत्ययः?
11) दण्डिनी इत्यत्र केन कः प्रत्ययः?
12) सुनयिका इत्यत्र केन इत्वम् ?

B) **अधोलिखितेषु यथारुचि पञ्च समाधत्त।** **3x5=15**

1) अनोः बहुव्रीहेः, मनः इत्यनयोः सूत्रयोः व्याख्या कार्या।
2) अभाषितपुंस्काच्च इति सूत्रं सोदाहरणं व्याख्यात।
3) असुपः किम् बहुपरिव्राजका नगरी इति ग्रन्थं यथाशास्त्रं प्रतिपादयत।
4) पादोऽन्यतरस्याम् इति सूत्रं प्रतिपादयत।
5) न यासयोः इति सूत्रं प्रकाशयत।
6) शूद्रा चामहत्पूर्वा जातिः इति वार्तिकं वर्णयत।
7) वनो र च इति सूत्रं सोदाहरणं वर्णयत।

C) **अत्र यथाच्छन्दं त्रयः समाधेयाः।** **5x3=15**

1) उगितश्च इति सूत्रस्य व्याख्यां कुरुत।
2) अजाद्यतष्टाप् इति सूत्रस्य व्याख्यां कुरुत।
3) उदीचामातः स्थाने यकपूर्वायाः इति सूत्रस्य व्याख्या कार्या।
4) अन उपधालोपिनोऽन्यतरस्याम् इति सूत्रस्याशयं प्रकटयत।
5) डाबुभाभ्यामन्यतरस्याम् इति सूत्रस्य व्याख्या कार्या।

D) **निम्नलिखितेषु अनुप्रियमेकम् अनुबध्नीत।** **10x1=10**

1) प्रत्ययस्थात्कात्.. इत्यत्र कात् इत्यनेन वर्णमात्रं विवक्षितमिति यथाग्रन्थं वर्णयत।
2) भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणामपि इति सूत्रं प्रकाशयत।

***

RKMVERI/DSP/BMAIS/18-23/J2022/SK-271

# SK-271 वैयाकरणभूषणसारे आदितो नामार्थप्रकरणं यावत्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **नीचैः दत्तेषु यथेच्छं दश प्रश्नान् उत्तरत।** **1x10=10**

1) फलं कस्य विशेषणम् ?
2) चतुर्थीविभक्तेः अर्थः कः?
3) अवधिः कस्य अर्थः?
4) साध्यत्वस्य लक्षणं किम् ?
5) सिद्धत्वस्य लक्षणं किम् ?
6) अशेषफलदातारमित्यस्य विग्रहः कः?
7) संख्या कुत्र विशेषणम् ?
8) फलं कुत्र विशेषणम् ?
9) कर्ता कुत्र विशेषणम् ?
10) षष्ठ्यर्थः कः?
11) वैयाकरणमतोन्मज्जनकारिकायाः कर्ता कः ?
12) कौण्डभट्टस्य पिता कः ?

B) **अधोलिखितेषु यथारुचि पञ्च समाधत्त।** **3x5=15**

1) चैत्रः ग्रामं गच्छति इति वाक्यस्य व्याकरणदृष्ट्या शाब्दबोधप्रक्रियां वर्णयत।
2) चैत्रः तण्डुलं पचति इति वाक्यस्य मीमांसादृष्ट्या शाब्दबोधप्रक्रियां प्रतिपादयत।
3) चैत्रेण ओदनः पच्यते इति वाक्यस्य न्यायदृष्ट्या शाब्दबोधप्रक्रियां प्रतिपादयत।
4) व्यापारस्य स्वरूपं प्रतिपादयन्तु।
5) श्रीलक्ष्मीरमणमिति मङ्गलपद्यस्य व्याख्या कार्या।
6) कर्तृतृतीयाया आश्रयोऽर्थः इति यथाशास्त्रं प्रतिपादयत।।
7) फलस्य स्वरूपं वर्णयन्तु।

C) **अत्र यथाच्छन्दं त्रयः समाधेयाः।** **5x3=15**

1) धात्वर्थविषयकं मण्डनमिश्रमतं वर्णयत।

2) धात्वर्थविषयकं प्राचीननैयायिकमतं प्रतिपादयत।

3) प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधं स्वीकुर्वतां नैयायिकानां मतं खण्डयत।

4) पचति इत्यादौ कर्तृकर्मणोः उभयोः बोधः कुतो नेति यथाग्रन्थं प्रतिपादयत।

5) उत्सर्गोऽयं कर्मकर्तृविषयादौ.....इति कारिका यथाग्रन्थं व्याखेया।

D) **निम्नलिखितेषु अनुप्रियमेकम् अनुबध्नीत।** **10x1=10**

1) फलव्यापारयोः धातुः इति ग्रन्थस्याशयं प्रकाशयत।

2) द्वितीयार्थं यथाग्रन्थं व्यासेन वर्णयत।

***

RKMVERI/DSP/BMAIS/17-22/J2022/MT/SK-293

## SK-293 व्याकरणसाहित्येतिहासः

समयावधिः- होराद्वयम् पूर्णाङ्काः- 50

---

A) **दश समाधेयाः** **1x10=10**

1) शवतिर्गतिकर्मा कुत्र भाष्यते?
2) बृहस्पतिः कस्मै व्याकरणं प्रोवाच?
3) इन्द्रश्चन्द्र इत्यादिकारिकया अष्टशाब्दिकान् कः स्मरति?
4) कुशाग्रबिन्दुवद् व्याकरणं केन कृतम्?
5) गौतमः पाणिनेः पूर्ववर्ती उत उत्तरवर्ती?
6) व्याकरणशास्त्रस्य द्वौ प्रमुखौ सम्प्रदायौ कौ?
7) ऋक्प्रातिशाख्यं केन कृतम्?
8) वररुचिः कस्य वेदस्य प्रातिशाख्यम् अकरोत्?
9) प्रतिज्ञासूत्रं केन कृतम्?
10) कातन्त्रव्याकरणस्य कर्ता कः?
11) देवनन्दी कस्य व्याकरणस्य कर्ता?
12) सरस्वतीकण्ठाभरणस्य कर्ता कः?

B) **यथाभीष्टं पञ्चानां टिप्पणीं लिखत** **3x5=15**

1) वैयाकरणः वायुः।
2) नव शाब्दिकाः।
3) भारद्वाजः।
4) चारायणः।
5) काशकृत्स्नः।
6) माध्यन्दिनिः।
7) व्याडिः।

C) **यथाभीष्टं त्रयाणाम् उत्तराणि लिखत** **5x3=15**

1) प्रातिशाख्यस्य लघु विवरणं कुरुत।
2) आपिशलेः परिचयं कारयत।
3) स्फोटायनस्य परिचयं कारयत।
4) शाकटायनस्य परिचयं कारयत।
5) पाणिनिना दृष्टप्रोक्तादिक्रमेण वाङ्मयस्य के विभागाः उक्ताः?

D) **यथाभीष्टम् एकस्य उत्तरं लिखत** **10x1=10**

1) पाणिनिपूर्ववर्तिनाम् आचार्याणां विस्तरेण परिचयं कारयत।
2) भगवतः पाणिनेः विस्तरेण परिचयं कारयत।

***

RKMVERI/DSP/BMAIS/18-23/J2022/MT/SK-301

# SK-301 वैदिकसूक्तानि निरुक्तं च

समयावधिः- होराद्वयम् पूर्णाङ्काः- 50

---

## Part A

A) **पञ्च समाधत्त** **3x5=15**

1) नासदीयसूक्तस्य ऋषिच्छन्दोदैवतविनियोगान् वर्णयत।
2) इन्द्रसूक्तस्य ऋषिच्छन्दोदैवतविनियोगान् वर्णयत।
3) तम आसीत् तमसा गूढम् इत्यस्य तात्पर्यं वर्णयत।
4) को अद्धा वेद इति मन्त्रं व्याख्यात।
5) परमे व्योमन् इत्यत्र व्योमन् इत्यस्य अर्थं व्युत्पत्तिप्रदर्शनपूर्वकं दर्शयत।
6) अहन्नहिम् इत्यादि मन्त्रं व्याख्यात।
7) वृषायमाणोऽवृणीत सोमम् इत्यादिमन्त्रं व्याख्यात।

B) **त्रीणि समाधेयानि** **5x3=15**

1) न मृत्युरासीदमृतन्न तर्हि इत्यादिमन्त्रं व्याख्यात।
2) तिरश्चीनो विततो रश्मिरेषाम् इत्यादिमन्त्रं व्याख्यात।
3) नासदीयसूक्तस्य परिचयं कारयत।
4) इन्द्रस्य नु वीर्याणि प्रवोचम् इत्यादिं मन्त्रं व्याख्यात।
5) यदिन्द्राहन् प्रथमजाम् इत्यादिं मन्त्रं व्याख्यात।

## Part B

C) **एकेन वाक्येन उत्तरत।** **1x10=10**

1) को नाम समाम्नायः?
2) सत्त्वप्रधानानि कानि?
3) वेदे कर्मसम्पत्तिः कः?
4) कुतः शब्देन संज्ञाकरणम्?
5) सांयौगिकाभ्युच्चयस्य किमुदाहरणम्?

6) कः उपसर्गः एकीभावं वदति?

7) चित् इत्यस्य उपमार्थे किमुदाहरणम्?

8) भावो नाम कोऽर्थः?

9) केषां मनुष्यवद् देवताभिधानम्?

10) पदचतुष्टयं नोपपद्यते इति कस्य मतम्?

11) अस्तिभावस्य कोऽर्थः?

12) उपसर्गाणाम् उच्चावचा अर्थाः सन्तीति कस्य मतम्?

D) **एकं प्रपञ्चयत।** **10x1=10**

1) चत्वारि पदजातानि वर्णयित्वा षड्भावविकारान् व्याख्यात।

2) निघण्टुपदार्थमुक्त्वा उपसर्गाणामर्थान् सोदाहरणं प्रदर्शयत।

***

RKMVERI/DSP/BMAIS/18-23/J2022/MT/SK-315

# SK-315 भाषातत्त्वम्

Time – 2 hours  Marks-50

A) **নীচের প্রশ্নগুলোর উত্তর দাও-(যে-কোনো দশটি)** **১ x ১০=১০**

1) একটি স্থাননির্ভর (positional) ভাষার নাম কর।
2) সংস্কৃত ভাষা একটি সর্বসমবায়ী/প্রত্যয়ান্বিত/যৌগিক সমবায়ী ভাষা
3) কেন্তুম শাখার যে কোনো দুটি ভাষার নাম কর।
4) পুনর্গঠন কী?
5) স্বরপথ কোথায় অবস্থিত?
6) ঘোষ ও অঘোষ ধ্বনির উচ্চারণে কী পার্থক্য?
7) সংস্কৃত ভাষার দুটি উষ্ম ধ্বনির উদাহরণ দাও।
8) অর্ধস্বর কাকে বলে?
9) ইন্দো-ইউরোপীয় *pətēr শব্দটির সংস্কৃত ভাষায় রূপান্তর দেখাও।
10) লাতিন centum শব্দটির সংস্কৃত রূপ কী?
11) সংস্কৃতের দুটি স্বজাতীয় ভাষার নাম কর।
12) স্বর বা Accent কাকে বলে?
13) √gam ধাতুর দীর্ঘ রূপের একটি উদাহরণ দাও।
14) ইন্দো-ইউরোপীয় *k ধ্বনিটির সংস্কৃতে কিরূপ পরিবর্তন হয়েছে?
15) সংস্কৃত ভাষায় দুটি অর্ধস্বরের (Semi-Vowel) উদাহরণ দাও।

B) **নীচের প্রশ্নগুলির সংক্ষিপ্ত উত্তর দাও-(যে কোনো পাঁচটি)** **২ x ৫=১০**

1) মৌলিক স্বরধ্বনির (Cardinal Vowels) উপযোগিতা কী? ক’টি মৌলিক স্বরধ্বনি পাওয়া যায়?
2) জৈব ভাষা (Organic Languages) বলতে কী বোঝ? দুটি জৈব ভাষার উদাহরণ দাও।
3) কোন্ কোন্ ইন্দো-ইউরোপীয় স্বরধ্বনি সংস্কৃত ভাষায় পরিবর্তিত হয়েছে?
4) রোমকীকরণ কী?
5) জিহ্বার বিভিন্ন অংশগুলি কী কী?
6) সক্রিয় উচ্চারক বলতে কী বোঝ?

7) অর্ধব্যঞ্জন (Syllabic Consonant) ধ্বনির দুটি উদাহরণ দাও।

8) অধিজিহ্বার (Epiglottis) কাজ কী?

C) **নীচের বিষয়গুলির মধ্যে পার্থক্য দেখাও-(যে কোনো দুটি)** **৫ x ২=১০**

1) মৌখিক ধ্বনি ও নাসিক্য ধ্বনি

2) স্পর্শ ধ্বনি ও উষ্ম ধ্বনি

3) সুরাঘাত ও শ্বাসাঘাত

4) জৈব ভাষা ও অজৈব ভাষা

D) **নীচের যে কোনো দুটি বিষয়ের ওপর প্রবন্ধ লেখ-** **১০ x ২=২০**

1) ভাষার শ্রেণীকরণ বলতে কী বোঝ? রূপতত্ত্বগতভাবে ভাষার শ্রেণীকরণ পদ্ধতি আলোচনা কর।

2) অপশ্রুতি কাকে বলে? প্রত্ন ইন্দো-ইউরোপীয় ভাষার অপশ্রুতি সংস্কৃত ভাষায় কিরূপ ভাবে

3) প্রতিফলিত হয়েছে? ভাষায় অপশ্রুতির উপযোগিতা কোথায়?

4) প্রত্ন ইন্দো-ইউরোপীয় ভাষার কণ্ঠ্যীয় ও কণ্ঠ্যৌষ্ঠ্য ব্যঞ্জনধ্বনিগুলির সংস্কৃত ভাষায় রূপান্তর উদাহরণসহ আলোচনা কর।

5) স্বরধ্বনি কাকে বলে? মৌলিক স্বরধ্বনির পরিপ্রেক্ষিতে সংস্কৃত ভাষার স্বরধ্বনিগুলির অবস্থান দেখাও এবং এগুলির শ্রেণীকরণ কর।

***

RKMVERI/DSP/BMAIS/19-24/J2022/MT/SK-331

# SK-331 सांख्यकारिका, योगसूत्रे समाधिपादश्च

समयावधिः-होराद्वयम् पूर्णाङ्काः- 50

---

## Part-A

A) **पञ्च समाधेयाः** **1x5=5**

1) कपिलस्य शिष्यः कः?
2) षष्टितन्त्रं कस्य ग्रन्थः?
3) आध्यात्मिकं दुःखं कतिविधम्?
4) न प्रकृतिर्न विकृतिः कः?
5) प्रकृतिविकृतयः के?
6) सम्भवप्रमाणस्य उदाहरणं किम्?

B) **यथाभीष्टं पञ्च समाधत्त** **3x5=15**

1) दुःखत्रयस्य संक्षेपेण परिचयं कारयत।
2) दृष्टे सापार्था चेन्न– प्रतिपादयत।?
3) प्रत्यक्षप्रमाणस्य लक्षणं तत्त्वकौमुदीदिशा व्याख्यात।
4) अनुमानप्रमाणस्य लक्षणं भेदान् च लिखत।
5) व्यक्ताव्यक्तयोः सारूप्यं निरूपयत।
6) व्यक्ताव्यक्तयोः वैरूप्यं निरूपयत।
